योगिनीदशाप्रारंभः ॥ ७ ॥



श्रीगणेशायनमः कथयिष्यामितेदेविग्रहाणांचाद्ययोगिनी तासांदशाक्रमंचैवफलंच
सैकसंस्थितं १ अंतर्दशाश्चसर्वासांसर्वदापरिपूजनं विशेषेणविरुद्धानांपूजनंतन्मनो
रमं २ सातुपरतरारक्षाकर्त्रीत्रिभुवनेष्वपि एतासुचविरुद्धासुनब्रह्मानचशंकरः ३ न
विष्णुर्नचलोकेशोग्रहाश्चापिनरक्षकाः तस्मादासांप्रयत्नेनकर्तव्यंपरिपूजनं ४ विद्या
कीर्तिधनारोग्यराज्यसौभाग्यमिच्छता मंगलापिंगलाधन्याभ्रामरीभद्रिकातथा ५ उल्का
सिद्धासंकटाचयोगिन्यष्टौप्रकीर्तिताः पिंगलातोसवेत्सूर्योमंगलातोनिशाकरः ६ भ्रामरी
तोसवेत्सोमोभद्रिकातोबुधःस्मृतः धन्यकातोगुरुर्भूयात्सिद्धातःशुक्रसंभवः ७ उल्कातो
क्षानुतनयः संकटातस्तमोसवेत् अस्याएवदशांतेयःकेतुरित्यभिधीयते ८ स्वर्क्षेपिनाकि
नयनैः २ संयोज्यवसुसिद्धैरेत् शेषेणयोगिनीज्ञेयाशून्यपादेचसंकटा ९ साजन्मयोगि
नीज्ञेयातामारभ्ययथाक्रमं गणयेत्स्वशिशिष्टानांयावत्सूर्यकमवेत्स्थितिः १० साजन्मयोगिनी
ज्ञेयापुनस्तत्सूर्यकालवर्तते वर्षमेकंमंगलायाः पिंगलायाद्विवर्षकं ११ एकमेकैकवृध्या

ष्टौयावत्स्वरक्षमाः समाः मंगलामंगलानंदयशोद्रविणदायिनी १२ पिंगलातनुतेव्याधिं
मनसोदुःखसंभ्रमौ धन्याधनसुहृद्बंधुरूपसौभाग्यकारी १३ भ्रामरीजन्मभूमिघ्नीभ्रा
मयेत्सर्वतोदिशं भद्रिकासुतसंपत्तिर्विलासावश्यदायिनी १४ उल्काधान्यधनारोगकारिणी
सुखकारिणी सिद्धासाधयतेकार्यंनृपजानांचराज्यदा १५ संकटासंकटाव्याधिमरणक्लेश
दायिनी नसंकटामंतरेणकस्यापिमरणंभवेत् १६ यदिनैवविपत्तिःस्यात्कृतेनसुकृतेन
वा तदाचालसमानस्यविपत्तिःस्यान्नसंशयः १७ मरणक्लेशसदृशंक्लेशमाप्नोतिनिश्चितं॥
॥ ॥इतिमहादशा॥ ॥अथांतर्दशा॥ ॥मंगलायास्तुचाद्यानिदिनानिदशसंहरि मा
सान्एकादशान्येषांवासराणिचविंशतिः १८ मंगलायाः स्वभोग्येनसर्वासांहृदिरीरिता
तथाहिमंगलावर्षसंकटायाद्विमासिकं १९ संक्षेपात्कथितंदेविवासराणिचविंशतिः एतेन
वर्षमात्रंतुपूर्णंभवतिनान्यथा २० दिनानिदशदेवेशितेनपूर्णंद्विवर्षकं धन्यायानिजभोग्यं
चभवेद्देवित्रिमासिकं २१ मंगलायाः स्वभोग्यंचमासमेकंतदाभवेत् अष्टमासाः संकटा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यास्तेनपूर्णेत्रिवर्षकं २२ भामर्यानिजभोग्यंतुपिगलात्मास्वभोग्यकं मंगलायास्ततोभद्रेमासा
दिगधिकंभवेत् २३ संकटायादशमासादिनान्यपिचविंशति: तेनपूर्णेभवेद्वेविचतुर्थ्यर्क्षचतुष्ट
यं २४ अष्टौचभद्रिकाभोग्यामासादशदिनाधिका: शेषायास्तुदशाहानितथामासास्त्रयो
दश २५ विंशाहोमासमाद्यायास्तेनभूतसमा:समा: उल्कास्वभोग्यवर्षंतुशेषायानिगमेधि
कं २६ मासद्वितयमाद्यायास्तेनषडर्क्षकंभवेत् सिद्धायानिजभोग्यंतुवर्षमासचतुष्टयं २७
दिग्दिनानितथाद्यायाद्विमासंदिग्दिनाधिकं शेषायास्तुमासंतुवर्षंविंशद्दिनाधिकं २८ त
यागणनयादेविपूर्णासप्तसमा:समा: अष्टम्यांनिजभोग्यंतुवर्षमासनवाधिकं २९ दिनानि
दशचादायमासौविंशद्दिनान्वितौ तयागणनयादेविअष्टपूर्णा:समागता: ३० तत्रयंत
दशाभद्रेतथारूपेणकल्पयेत् विरुद्धायास्तदंतश्चेत्क्षयंनाशयतेनरं ३१ मंगलायादशायां
तुमंगलांतर्दशायदि मंगलायास्तदंतश्चेत्साध्नोत्येवमनोरथं ३२ दशाद्वयंसमीचीनमेक
मेवान्यथाभवेत् तदामिश्रफलंविद्यादन्यथापिविमिश्रकं ३३ दशामंतर्दशाचैवतत्तत्संतर्द

शातथा॥एवंविज्ञायभोदेविपूजयेतामनन्यधी:॥३४ तस्यलक्ष्मीर्यनारोग्येविद्यासिद्धि:करेस्थिता
तस्मान्नित्यंपूजनीयातत्तन्मंत्रै:सविस्तरात्॥३५ किंकुर्वंतिग्रहा:सर्वेविरक्ताअपिपार्वति विशे
षात्संकटादीनास्वदशापरिवर्तनं ३६ तत्तन्मंत्रैर्जपापुष्पैर्धूपैर्गुग्गुलसंभवै:घृतदीपैश्चमधुरै
र्नैवेद्यै:पायसादिभि:॥३७ रक्तालंकारकैरक्तवसनैरक्तचंदनै:॥स्वर्णालंकरणैश्चापिसद्व्यैर्ब
हुपक्वकै:॥ ३८ तर्पयेत्परमेशानितत्तन्मंत्रै:सहस्रधा सुवर्णपात्रेनिष्पन्नेअष्टायामेम
नोरमे॥ ३९ कृत्वायंत्रंयथोक्तंतुतत्रसंपूज्ययोगिनीं तत्तन्मंत्रवरंजप्त्वाविघ्नशांत्यैसहस्र
रा: ४० सप्ताहेनभवेद्देविविधोत्पातवारणं तत्तच्चकुंडंविधिवत्कृत्वातुचतुरस्रकं ४१
अथवास्थंडिलेस्थंसुलिप्तेगोमयांबुभि: चतुर्हस्तप्रमाणेनजापकस्थिरमानस: ४२
योगिन्यग्नितुसंस्थाप्यकृत्वापूर्वोदिता:क्रिया: अभ्यासादशवारंतुविरुद्धायाःसहस्रधा ४३
बिल्वपत्रैस्सफलैश्चतथान्यैर्नागकेसरै: जुहुयात्सायसान्नेनतथैवकुलवस्तुना ४४

सहस्रमयुतंवापिलक्षंवैकामनाक्रमात् अथवानुक्रमेणैवजुहुयात्स्वस्ववक्त्रभिः ४५ दक्षिणांतंसमाप्येवंतत्रारिष्टमनुंजपेत् वियद्बिंदुवामनेत्रांशिरोयुक्तामनंतरं ४६ मंगलेमंगलापश्चाल्लुप्तेवह्निप्रियान्वितः एकादशाक्षरोमंत्रः सर्वमंगलदायकः ४७ कृत्वानेनषडंगानि दीर्घषड्युजाग्नियेध्यायेद्ब्रह्मांत्रिनयनामुद्यतादित्यसन्निभं ४८ परस्मैरमुखांसोज्जांसिंदूरासंदराधरां पमद्वयधनुर्बाणान्दधतीभुजपल्लवैः ४९ सगुंजन्मंजुमंजीरकांचीगुणविराजितां एवंध्यात्वामहेशानिपूजयेदुक्तवस्तुभिः ५० इच्छाज्ञानक्रियांसद्देत्रिषुकोणेषुपूजयेत् मन्मथायचतद्बाह्यः पंचकोणेषुपूजयेत् ५१ षडंगंपूजयेत्पश्चाद्दलपत्रदलेषुच एवंविधविधानेनपूजायित्वाद्ययोगिनी ५२ योगिनीक्षेत्रबटुकाणाधिपबलिंहरेत् ततोलब्धमनुंजप्त्वाजुहुयादग्निपुरःसरं ५३ मंगलासक्तचित्तानांकिंनसिध्यतिभूतले द्वितीयायाःप्रवक्ष्यामिमंत्रध्यानजपादिकं ५४ सहाहितकरंपुंसामहितानांचनाशनं मंगलांतंवह्निपूर्वंपंचमाग्निशिवस्वरैः ५५ अग्न्यंतबिंदुनाद्याविंगलेवैरिवारिणी प्रसीदेतिफलंतस्यान्नयोद ३

आंक्रौंपेंप्रौंअंद्वितीयमंत्रः

शभिरक्षरैः ५६ षडंगध्यानपूजादिसर्वंपूर्ववदाचरेत् विशेषःपुनरत्रास्तेशत्रूच्छेदाभिचारिके ५७ चर्मखड्गधरामुग्रांध्यायेत्षड्भुजधारिणीं गरुडासनमासीनांसैन्यविग्रहकारकां ५८ लक्षमेकंप्रजप्यादौजपेल्लुप्तंहितर्पयेत् एतद्दीपकर्तृणांविशेषोयंव्यवस्थितः ५९ तृतीयायाःप्रवक्ष्यामिमंत्रंसर्वसुखावहं यव्यांतंचवरारोहेवायव्यंचतुरीययुक् ६० शिरोयुक्तंचधनदेस्वाहेधन्येतिपार्वति वस्वर्णमिवपूर्वाधाध्यानपूजाजपादिकं ६३ विनायासंदरिद्रोपिधनवानिहजायते तुंडाक्षरसमायुक्तंतुरीयंबिंदुशोभितं ६२ भ्रामरीतिपदंपश्चाज्जगतांमेइतीश्वरी क्षोभरीतितत:कामंबीजंचपरमेश्वरि ६३ द्वितीयायाइवप्रोक्तंध्यानपूजाजपादिकं षडंगंचैवसर्वांसांपरयैवसमाचरेत् ६४ अथवाबीजपूर्वेणबीजेनसकरंवदेत् वारुणंधरणीक्रांतंषडक्षरशिरोदितं ६५ सद्विकेमेइतिततोममक्षद्वमनंतरं देहीतिपरसद्वाणिनाशयद्वितयंप्रिया ६६ वह्निरितिमनुःप्रोक्तःपंचम्यास्तपरद्वयात् तारमंत्रंममप्रोक्तंरोगंनाशयभंजय ६७ एकादशाक्षरोमंत्रः सर्वरोगविनाशकः ध्यानपूजादिकंदेविउल्कायाःकथितंप्रिये ६८ पराबीजंततःसिंहेवायव्यार्दिसगमन्वित

यो.६ सर्वेतिमानवान्नोतिसाधयेद्धितयंवदेत् ६९ नमोंतंदेविसप्तम्यांपुनःसप्तदशाक्षरः सप्तम्या
४ दिशिवयुतंबीजंत्रैलोक्यमोहनं ७० संकटेइतिरोगंमेनाशयद्वितयंवदेत् परंममेतिगर्भे
तुसंकटोमनुरीरितः ७१ षोडशार्णःप्रकथितःसर्वदुःखापनोदनः ध्यानपूजादिकंदेविद्वि
तीयायाद्वाचरेत् ७२ द्वादशार्णोमंत्रराजःकथनीयस्तवाधुना गोपितासर्वमंत्रेषुनच
केषुप्रकाशितः ७३ सर्वकामप्रदाप्तद्वेत्रिसंध्यंतेमयातव शयेतवशिरोधृत्वानास्यतु
ल्योप्तवेन्मनुः ७४ षष्ठ्याथकामबस्वर्णेषष्ठतुर्यैरविस्वरैः यिनपूर्वेमुखंप्रोक्तं—बीजत्र
यंन्नियं ७५ पुटीकृतोष्टमोमंत्रोप्यमृताख्योमनुर्भवेत् बीजत्रयंसमाद्दत्याषडंगंन्या
समाचरेत् ७६ षड्भुजांरक्तनयनांरुधानांखड्गचर्मणी कालस्वरूपांसर्वेषांब्रह्मविष्णु
पिनाकिनां ७७ चतुर्दशसमोपेतांभीमसंवेक्षणत्रयं स्फुतांदेवैःसमासीनांसशिवश
तवोपरि ७८ कृपादृष्ट्यावीक्ष्यमाणांभक्तारोगिणिमीश्वरीं अथैवैतादृशींध्यायेत्सुंद
रीमेवषड्भुजां ७९ ध्यात्वापूजाविधौरोउपचारैस्तथाविधैः जपेद्वादशसाहस्रंसर्वतस्ती
तमानसः ८० अविछिन्नक्रमेणैवविधायमखमीश्वरि मृतोपिजीवेत्किमुतरोगीयःसं

कटेस्थितः ८१ क्षानोरुदयमारभ्यक्षानोरुदयमावधि योगिन्यग्नेोक्तेदेविमधुरैर्म
धुरैस्त्रिभिः ८२ तदासक्तमनाभूत्वायदिवाकुलवस्तुभिः पूरयित्वानिशीथेतुप्रातरेवा
लकादृते ८३ पशुसंचाररहितेउपचारैरशेषकैः॥ पूजयेद्योषकमयींनारीरूपांशुभव्र
तां ८४ मत्स्यमांसकुलद्रव्यैस्ततस्तस्याबलिर्हरेत् अपूपैःपायसैःपूपैर्व्यंजनैःसम
रीचकैः ८५ तालीहिंगुचरुक्षीरसुगंधिभिरितस्ततः एवंविधैःकुलद्रव्यैयोगिनीप्री
तिकारिभिः ८६ युक्तंमत्स्यैर्बलिंदद्यान्नित्याकवचमीश्वरि पठित्वाचस्वयंस्तुत्वापाय
सान्नीशवेन्निशि ८७ प्रातरौषधरूपंतुतारतम्यांनंतुकिंचन आर्तायरोगिणेदत्वादृष्टि
णाभुछिरेत्सुधीः ८८ समाहितमनाभूत्वाभूयोभूयास्तयाशपेत् प्रायस्त्वनंतरंरो
गीम्रियतेनकदाचन ८९ तत्रकालानलःक्रुद्धःक्षीरोपियदिहारकः म्रियतेदेवयो
गेनत्रायेणाभ्यंतरेयदि ९० तदास्तगेनविधिनाकर्तुरेवफलंलभेत् एतत्तेकथितंदेवि
गुह्याद्गुह्यतरंमहत् ९१ नदेयंयस्यकस्यापिनाशिष्येक्यःप्रकाशयेत् राज्येराज्य

अदायोपिपुत्रायप्रणतायच ९२ नमस्कारायतिचेद्दद्यांसवीर्यांसफलाप्तवेत् अन्यथा क्षयमाप्नोतिप्तस्मराशीयथानलः ९३ ॥ ॥इतियोगिनीतंत्रेयोगिनीदशासमाप्ता ॥अथमंत्रोद्धारः ॐह्रींमंगलेमंगलायेस्वाहा ११ क्रुंपिंगलेधेरिधारिणिप्रसीदफट् १३ श्रींधनदेधन्येस्वाहा ८ क्षींभ्रामरिजगतांमेआधीश्वरिभ्रामय १५ क्रींकुंसद्विकेम मप्तद्रंरेहिपरप्तद्राणिनाशयस्वाहा २१ ॐउल्केमभरोगंनाशयज्वंप्तय १३ क्रींसिद्धेमे सर्वमानसंसाधयसाधयनमः १७ क्रोंसंकटेरोगंमेपरमंनाशयनाशय १६ ॥ ॥ ॥इतिमंत्रोद्धारः ॥ ॥अथांतर्दशाविभागः ॥ ॥जन्मर्क्षतः सायकबाङ्कऋक्षं २५ तिथिर्यराजन्मप्तवेश्मयुग्मं २० ॥चतुर्थतारायदिपंचवारएकत्रयोगंकरणंनराणां ए तच्चतुष्कंवर्षेयत्रस्यात्तत्रएकतः तस्मिन्वर्षेप्तवेन्मृत्युः संशयोयदिन्यान्यथा ॥ ॥ ॥इतिमृत्युकालज्ञानं ॥ ॥मासेदश १० दिनेषष्ठे ६ इंद्र १४ तिथि १५ मूर्छनाः २१ ॥प्तक्के नव ९ लग्नेधननंनार्याःप्रसवेशिशुर्भवेत् ॥ ॥इतिबीजक्षेपेणकालात्प्तसवज्ञानं ॥ ॥य देकदाव्यवस्थोतुसुतेश्वरक्षयान्वितो तदाक्रिगुर्विणीवधूःप्रसूयेतचनान्यथा ॥ ॥

॥इतियोगिनीदशाप्रकारस्तथामंत्राणिसमाप्तानि ॥ ॥अथर्क्षस्यभुक्ताघटीस्तैर्दशाद्यैर्वि हन्यात्तथासर्वतोंशविभक्ता सवर्षपूर्वाहिभुक्तादशासास्ववर्षेचपाल्याप्तवैक्ष्योग्यसं ज्ञा भुक्तप्रकारमपरंखलुमंगलादिवर्षादिरागगुणैश्चगुण्या भुक्तांदिनादिकमिदंमुनि नाप्रभुक्तं ॥ ॥अथचंद्रस्योपरिभुक्तभोग्यानयनं ॥ ॥कलाहिमांशोर्वियदभ्रनागै८०० र्लब्धंगतर्क्षेदशयाचशेषं हन्यात्तथाप्तास्कर१२खाग्निभि३० श्चषष्ट्या६० चहन्याच्चघ टीफलंतत् अथांतर्दशायाःप्रकारंप्रवक्ष्यिदशावर्षकंचास्यवर्षेणहन्यात् ततःषड्वि गैश्चयल्लब्धमानंदशाद्यादिकास्वेटविड्भिश्चज्ञेया १ मं १ चं० पिं २ सू० ध ३ गु० भा ८ भौ० भ ५ बु० उ ६ श० सि ७ भु० सं ८ राहुः ॥ ॥अथैषांफलानि ॥ ॥वैरिणांचविपद्विनाश कृत्वाहनादिवसुरत्नलाभदा कामिनीसुतगृहाद्यिलाप्तदामंगलासकलमंगलोदया १ दुःखशोककुलरोगवर्द्धिताव्यग्रताचकलहः स्वजनेश्च अंत्यभागफलदाकथिता सोपिंगलाचविदुषांसुखदादो २ धनंधान्यवृद्धिर्धरानाथमान्यंसदायुद्धभूमौजयं

धैर्यवंतं कलत्रांगजानांसुखंचित्रवस्त्रैर्युतंधन्यकाधातुवृद्धिंकरोति ३ विदेशभ्रमंहानिरूढ़ गताचकलत्रांगपीड़ासुरैर्वर्जितत्वं ऋणव्याधिशोकंतथाभूतकोपंदशाभ्रामरीभोगसं गंकरोति ४ धनानांविवृद्धिंगुणानांप्रकाशंसमीचीनवस्त्रागमंराज्यमान्यं अलंकारदि व्यांगनाभोगसौख्यंसदाभद्रिकाभद्रकार्यंकरोति ५ क्षयंव्याधिशोकंज्वराणांप्रकष्टंध नादेश्वदाराद्दिकानांवियोगं स्वगोत्रैर्विवादंसुहृद्बंधुवैरंसदाउत्कटानर्थकत्रीसदैव द राज्ञोभिमानंस्वजनादिसौख्यंविद्यांचसिद्धिंप्रकरोतिपुंसां श्वेतांबरंचाथमहाप्रतिष्ठा सुसाधनंमंत्रमथार्थसिद्धिं ७ जनानांविवादंज्वराणांप्रकोपंकलत्रादिकष्टंपशूनांवि नाशः गृहेस्वल्पवासःप्रवासाभिलाषंदशासंकटासंकटंराजपक्षात् ८ नकस्यापिना शंनचसंकटांविनालोकांतरप्राप्तिरिदंध्रुवंयत् पुण्यैनचेत्तत्रनजातमत्रविपत्तिशोको त्सवतीहतस्य २ नोचेत्तदाचात्मजनस्यहानिर्मातुःपितुर्वस्त्रविभूषणादेः कोशस्यपु त्रस्यतथायुवत्यादद्दातिशोकंखलुसंकटाया १० इतिमयालिखितंहिदशाफलंतत्सवे नयुतंचचमत्करं शिवशिवाकथितंशिवयामलेकथमिदंहितिरस्करणीयं ११ ॥ ॥ ६

॥ ॥इतियोगिनीदशाफलं॥ ॥अथांतर्दशाचक्राणिफलानिचलिख्यंते॥ ॥अंतर्दशाफ लमहंतनुभाव्यसर्वेजंतोःशुभफलायकरोमिसौख्यं विवृद्धिरत्नतदधीशफलंविचार्य लेख्यंचजन्मसमयेचतुरैःफलज्ञैः १ दिव्यांगनानांसुखभाकुचमर्त्योमानीनरेशस्य चकीर्तियुक्तः अश्वादिदंतादिकलत्रयुक्तश्चेन्मंगलामंगलमध्यगास्यात् २ प्रसापा नलेनेवदूरीसवंतिप्रतिस्पर्द्धिनोराज्यमानत्वमत्र धनप्राप्तिरत्नांबराणांसुखंस्या द्यदामंगलोमध्यगापिंगलाचेत् ३ व्यापारतोबहुसुखंधनवृद्धिरत्नमित्रादिवस्त्र धनधान्यगृहादिलाभः शत्रोःपराजयइहस्वजनेप्रतिष्ठाधन्यादशामवतिमंगल मध्यपाके ४ शरीरनेत्रामयकंठरोगपामादिकारोसहजापदश्च सर्वांगपीड़ास्तरणी वियोगंचेद्भ्रामरीमंगलगामिनीस्यात् ५ शरीरसौख्यंऋणमोचनंचधनेसमृद्धी र्तिविशेषवृद्धिः देशाधिकारोन्नपमान्यताचसद्दादशामंगलमध्यगाचेत् ६ चित्रभ्र मंभ्रमणतःपथिचोरकष्टंशोकोदयंस्वजनवर्गविवादमुग्रं रामादिपुत्रकलहोदि देहपीड़ाउत्कायदिासवतिमंगलपाकमध्ये ७ व्यापारसिद्धिर्धनधान्यलाभोमा

नार्थलाभोयुवतीविलासः संतानसौख्यंरिपुहानिरत्रचेत्सिद्धिकामंगलपाकमध्ये ८
धनस्मृतिःकलिचौरजनाद्भवेच्चरणनेत्रशिरःपरिपीडनं सुतकलत्रवियोगभयंसवे
द्यस्थिचमंगलपाकसंकटा ९ मयालेखितंमंगलंपाककृगानांफलंसर्वमेच्चमत्कारिभू
तं अतोवच्म्यहंपिंगलामध्यगानांफलंखेटविद्भिःसदाचिंतनीयं १० ॥ ॥अथ
पिंगलामध्येंतर्दशाफलं॥ ॥शरीरेसुखंव्याधितोपत्यनाशंधनेवाहनेवैसवेद्दुता
च गृहेस्वल्पवासःप्रवासाभिलाषंयदाचिंगलापिंगलापाकमध्ये १ शत्रोर्विमर्देन
करीऋणमोक्षकत्रीराजप्रसादफलसाधनधान्यदात्री पुत्रादिसंचयकरीनिजगेहदा
त्रीधन्यादशायास्तिसवेन्ननुपिंगलायां २ शोकोदयंविकलतांविविधांतिकत्रीदेशां
तरेफलवियोगकरीऋणार्तिः हानिर्ध्रुवंसुतकलत्रजनैर्वियोगंचेत्भ्रामरीभवति
पिंगलपाकमध्ये ३ मित्रादिसौख्यमणिमौक्तिकलाभदात्रीसूर्यासुतादिसुखदा
धनधान्यदात्री देशाधिकारपदवीननुयद्वतीयंचेद्दृष्टिकाभवतिपिंगलपाकमध्ये॥ ७

४ सदाविग्रहोवादयुद्धेअतीवप्रतिस्पर्धयाभाषणेतसराज्ञः धनार्तिश्चवस्त्रादिकानां
वियोगोयदाउल्किकापिंगलापाकमध्ये ५ सौभाग्यसिद्धिर्विजयोरिपूणांदेवार्चनंब्रा
ह्मणपूजनंच मित्रादिसौख्यंविनयादिदृष्टिंसिद्धादशापिंगलपाकमध्ये ६ चोराद्भनंन
श्यतिसर्वदुःखंहानिर्भयंपुत्रकलत्रसिद्धो ज्वरोदयंसंधिसमीरपीडातमोधिकापिंगलपा
कमध्ये ७ तुरगभवनदाराद्व्यपुत्रादिसौख्यंनरपतिकुलमान्यंसर्वदाधर्मबुद्धिः॥
भवतितनुनिरोगापुष्टतास्याच्छरीरेसकलसुखसमृद्धिंमंगलापिंगलायां ८ मयाले
खितंपिंगलापाककालेफलंखेटविद्भिःसदाचिंतनीयं अतोवच्म्यहंधन्यकापाक-
गानांफलंसर्वमेतच्चमत्कारभूतं ९ ॥ ॥अथधन्यादशायामंतर्दशाफलं॥ ॥
मेधाचमानमहिममतास्वकीयेविद्यामतिर्धनकलत्रसुखानिशश्वत् शत्रोर्जयंसव
तिचात्रमहत्सुखंहिधन्यायदासवतिमध्यगताचधन्या १ अलसतिमिरतंद्रावायु
युक्तंशरीरममरकुलद्विजानांद्वेषणंविग्रहंच यवनजनविवादंमानसेमानसंगंयदि
भवतिचधन्यामध्यगाभ्रामरीचेत् २ अतुलविमलकीर्तिर्द्रव्यदृष्टिस्तपोभ्यःस्वजन

सुतकलत्रेभ्यःसदासौख्यमत्र कठिणरिपुविनाशोगुप्तसौख्यादिवृद्धिर्यदिभवतिच धन्यामध्यगासद्विकाचेत् ३ व्ययकलहविपत्तिर्वादवैकल्यताचरिपुविविधविकोरोर्ध ग्रहोबंधुभिश्च नृपनिशिचरपीडावातपीडाचसंधौयदिभवतिचधन्यामध्यगाउल्क टाचेत् ४ नृपतिमानविशाखौविग्रहंहतरिपुंतरगार्थयुतंसदा सुतकलत्रसुखंननुसि द्धिकात्रकुरुतेयदिधन्यदशागता ५ कलत्रकष्टंकमलावियोगंशत्रुत्रकोपंनृपश्चोर भीतिं वाताभिरोगंव्रणविद्रुलंचतमोधिपाधन्यदशागताचेत् ६ भूपाज्ञयंक्षितिविका रविचित्रभोगंप्रौढप्रतापनिहतारिगणंसपुण्यं द्रव्यादिलाभयुतमत्रचतीर्थलाभ मङ्गाधिपायदिचधन्यदशांप्रपन्ना ७ सदाशत्रुनाशःस्वगोत्रेप्रतिष्ठामहद्व्यला भोविवादेजयश्च स्वदारादिसौख्यंकलत्रेर्थसिद्धिर्सवेद्वन्यगापिंगलाचेत्तदानीं ८ ममालेखितंधन्यकापाकगानांफलंसर्वमेतत्चमत्कारभूतं अतोवच्म्यहंभ्रामरीपा कगानांफलंखेटविद्भिःसदाचिंतनीयं ९ ॥ ॥अथभ्रामरीदशायामंतर्दशाफ लं॥ ॥विकलबुद्धिधनार्तिकरीमहत्समरभूमिषुदुर्गतिवेशनं तुरगखेदहनहा

निरथापरंभ्रामरिपाकगनाथदिभ्रामरी १ भूपालतोबकुसुखंमहतीप्रतिष्ठाभाग्योदयं स्वजनपुत्रकलत्रलाभं भोगादिलाभमतुलंकुरुतेचसद्राचेद्भ्रामरीपरिगतान्नृपतेर्ध नाप्तिं २ वातामयंश्लेष्मशिरोव्यथांचकुष्ठादिकष्टंकुमतिर्भयंच रिपूदयंकीर्तिविना= शकत्रीक्षोमीदृशामध्यगतोल्कटाचेत् ३ दुर्ग्रंविवादंकुमतेःप्रकाशंमांगल्यवस्त्रा= भरणादिलाभं प्रज्ञाविशेषान्नृपमान्यताचक्षोमीदृशामध्यगताचसिद्धा ४ तनोदुःख कंराजयक्ष्मादिभीतिंसुहृद्बंधुकष्टंगृहेस्ववासः मतेर्विभ्रमंघातपातादिकंचयदाभ्रा मरीपाकगासंकटास्यात् ५ रजतविद्रुमहेमवरांगनासुखमहीपतिमान्ययुतंन रं विमलकीर्तियुतंकुरुतेकुजाधिपगतारवलुमंगलिकाफलं ६ निपुणमतिविनी तंवेदशास्त्रार्थबुद्धिंस्वजनधनसुखाढ्यंतीर्थयात्रार्पितार्थं निजसकलरिपुघ्नंमानि नंपिंगलाचेद्यदासवतिकदाचिद्भ्रामरीमध्यगात् ७ प्रतापानलेर्सन्निताशेषशत्रुं कलत्रात्मजश्रेष्ठसौख्यंविधत्ते तदाहीरकादिप्रवालस्थलब्धिंदशाधन्यकाभ्रा मरीमध्यगाचेत् ८ मयालेखितंभ्रामरीपाकगानांफलंसर्वमेतच्चमत्कारभूतं

अतोवच्यहंभद्रिकामध्यगानांफलंखेटविद्भिःसदाचिंतनीयं २ ॥ ॥अथभद्रिका
दृशायामंतर्दशाफलं॥ ॥ग्रोढप्रतापंविजिताखिलपक्षंक्षोणीपतिप्रीतिमहाप्रतिष्ठं प्र
सन्नमूर्तिंकुरुतेधनाढ्यंभद्रादशाषड्विकपाकमध्ये १ तदुकंडुमुखरोगपीडितंवाजिगा
हनविनाशदुःखितं वह्निचोरनृपशत्रुपीडनंषड्विकासवतिचोल्कयान्विता २ यज्ञादि
कर्माणिचसाधुसौख्यंभवेत्सवृत्तिर्द्विजदेवभक्तो अंत्यंतमर्थोविभुतासमेतश्चात्षड्वि
काभद्रिकपाकमध्ये ३ ज्वरवमविकारंगुप्तदुःखंविपत्तिरनलभयविषैर्वादयुद्धे
विनाशः निजकुलपरिभ्रंशःक्लेशपीडाव्रणाढ्यंयदिसवतिचषड्रामध्यगासंकटाचेत्
४ धान्यंबराणिनिजवर्गसुखानिपुष्टिंलीलाविलासपुरपत्तनप्राप्तिसिद्धिं वित्ता
गमंत्रकुरुतेचमहत्प्रतिष्ठांषड्रादशांगतवतीकिलमंगलाच ५ सुखमनंतधनंक
लिनाशनंविमलबुद्धिविलाससुखानिच अमलकीर्तियुतंकिलपिंगलासुतसुखं
कुरुतेंतरभद्रिका ६ कलत्रसौख्यंमहिषंसधेनुद्व्यामंशत्रुजयंविवादे नृपेभ्य राम
इष्टंकुरुतेचधन्याभद्रादशायांतनुतेप्रतिष्ठां ७ कलत्रपुत्रादिवियोगदुःखंमहद्भयं ८

भूपकृतंत्वनिष्टं त्रिदोषरोगंवशरीरकष्टंचेद्भामरीभद्रिकपाकगा स्यात् ८ ॥ ॥
अथोल्कायामंतर्दशाफलं॥ ॥देहेपीडाजायतेवातपित्तैःराज्ञोभीतिर्वह्निभिःधुभिःश
त्रुभिश्च स्त्रीपुत्रादेःस्याद्वियोगोविपत्तिश्चोल्कापाकेचेद्भवेदुल्किकाच १ क्रया
द्विक्रयाच्चातिलाभःसुवर्णात्तथावस्त्रतोधान्यतश्चाश्वलाभः पुरेनाथनाराजमान्य
त्वमत्रभवेदुल्किकापाकगासिद्धिकाचेत् २ शिरःकर्णनासाक्षिकंठेविकारोभवे
क्लेशकष्टान्नपाच्चौरतोपि भयंबंधनंदेहपीडावियोगंभवेदुल्किगापाकगासंक
टाचेत् ३ रोगादिनाशंरिपुकष्टनाशंलाभोभवेद्देशपतेःसकाशात् पोगजनास्त
स्यसहायकाःस्युश्चेन्मंगलाचोल्कटपाकमध्ये ४ वारांगनाहासविलाससौख्यं
वस्त्रादिलाभंधनधान्यसौख्यं पुण्यमतिःस्याद्द्विजदेवतीर्थे चेदुल्किकापाकगा
पिंगलास्यात् ५ सुखोदयंमित्रसमागमंचरिपुक्षयंदेशनराधिपत्यं बहुप्रतापेन

चसर्वमैत्रीचेदुल्किकापाकगास्तीव्रधन्या ६ देशत्यागंव्याधिदुःखैर्वियोगंबंधू
द्वेगंबुद्धिनाशंचकूशं तेजोभ्रंशंचाधिचोरादिभीतिंउल्कापाकेजायतेभ्रामरीचेत्॥
७ स्फुवर्णमुक्तादिकलाभमुग्रंवाणिज्यतोतीवधनागमःस्यात् चतुष्पदप्राप्ति
रिहोत्कटायांचेद्भद्रिकास्वीयगृहस्यलब्धिं ८ ॥ ॥अथसिद्धिकादशायामं
तर्दशाफलं॥ ॥द्रव्यागमंमनसिचिंततितकार्यसिद्धिर्गेहेविवाहसुखमंगलसि
द्धिताच रामासुतादिसुखमत्रसवेद्धिभूतंचेत्सिद्धिकासिद्धिकपाकगास्यात् १ आल
स्यतंद्राकटिगुह्यपीडाआमादिरोगोदरपातयोगः राज्ञोतिक्षितिंजलवह्निभीतिंसि
द्धादशायांयदिसंकटाचेत् २ मुक्ताप्रवालमणिविद्रुमलाभरीक्षानानाविधंधनच
यंकुरुतेविपुलं दिव्यांगनावदनपंकजषट्पदत्वंचेन्मंगलासिद्धिकपाकमध्ये ३ आ
र्द्रंकपोलंसमरेशरीरंहेमादिरत्नैःपरिभूषितलं कामाधिकंकामिनिसंगरेचसि

द्धादशायांयदिपिंगलाचेत् ४ गृहद्वारिकेवारणेरंगराजीविचित्रांबराणांसुखंदे
शलाभं कुटुंबाधिकोमित्रपक्षादिलाभोयदासिद्धिकामध्यकाधन्यकाचेत् ५
जनापवादंसुतनोश्वकष्टंपुत्रादिमित्रैश्वसवेद्धिदूयं नृपादिभीतिंकलहंचरोगंचे
द्भ्रामरीसिद्धिकपाकगास्यात् ६ सकलतापहृतिश्चसुखोदयंविमलकीर्तिगुणंवि
पुलंधनं विपुललोकसुखंनृपमान्यताबुधरशाचभृगुंसमुपागता ७ सुखा
दिनाशंतनुरोगदुःखंनृपादिकुष्टंकलहंकुमित्रं मनोविमोहंभ्रमणंविदेशंचेदुल्कि
कासिद्धिकपाकगास्यात् ८ ॥ ॥अथसंकटादशायामंतर्दशाफलं॥ ॥देहा
दिकष्टंमरणेनतुल्यंरोगादिकंवातकफप्रपित्तैः।त्रिदोषदोषंरिपुवर्गभीतिंचेत्संक
टासंकटपाकगास्यात् १ श्रीस्त्रीसुताप्तिधनधान्यवृद्धिः पुंसश्चसत्पुरुषसोद्र
दर्शोरवादि सुज्ञातपंडितकलालिखनेमतिःस्याच्चेन्मंगलाभवतिसंकटपाकगा

गास्यात् २ प्रवालमुक्ताफलवस्त्रलाभंक्रयाणकात्सर्वजनेषुमैत्री स्याच्चलाभं
खलसेवकानांचेत्पिंगलासंकटपाकमाप्नुयात् ३ सेवास्किंदेवगुरुद्विजानांदानेस
तीर्थजपाद्दिहोमे बहूद्यमःस्याद्धनलाभेरत्नचेत्संकटायांसवतीहधन्या ४
देशाटनंपर्वतमस्तकेषुज्वरादिपीडाधनहानिरत्र वातादिरोगंरिपुभीतिदुःखंचे
द्भ्रामरीशङ्कटशाप्नुयात् ५ अतनुकीर्तिबलाधिवर्धनंरिपुगणस्यचसंहृतिरत्र
वै सकलतापहृतिश्चसुखोदयंयदिचसंकटपाकगासदि का ६ महारोगपीडाक्षिना
सेचकर्णेतथापादमूलेकटीगुह्यपादौ धनेहानिरुद्वाहनेनाशकर्तीभवेत्संकटापाक
गाचेल्कटाचेत् ७ भवेन्महाज्ञानपकार्यकर्तीविद्यांचशास्त्रस्यकलासुदक्षः अ
नेकमैत्रीप्रियदर्शनंचसिंधादृशासंकटपाकगास्यात् ८ ॥ ॥इतिसंकटादृशा
यामंतर्दशाफलं॥ ॥अथमिश्राध्यायः॥ ॥विरुधायांदशायांतुविरुद्धांतर्दशा ११

यदि विरुद्धायास्तदंतश्चेद्ध्रुवंनाशयतेनरं १ मंगलायांदशायांतुमंगलांतर्दशायदि मंग
लायास्तदंतश्चेत्प्राप्नोत्येवमनोरथं २ दशाद्वयंसमीचीनमेकमेवान्यथाभवेत् तयोर्मिश्र
फलंविद्यादन्यथापिचमिश्रदा ३ अथपूजाविधिः॥ ॥हरोपूजितेसर्वदेवाःसुतुष्टास्त
थास्यर्चितास्वासुरविष्टोनवापि प्रसन्नाभवंतिध्रुवंतस्यपुंसःशिवेनोक्तमेतच्छिवायाःपु
रस्तात् १ श्रीरुद्रोक्तमनुःसहस्रमथवालक्षंजपेद्योगिनीध्यानंचेतसिसंविधायचद्
शांशंहोमयेतद्विधिः अन्यद्दुग्धघृताद्यैर्मधुयुतैरुक्तैस्तथावस्तुभिस्तस्याशांसचतर्पणं
निगदितंविप्रांस्ततस्तर्पयेत् २ एवंयस्यविरुद्धयोगिनिमनुंजस्वाविधिंकुर्वतेविद्याया
मयुतंचदुःखरिक्षसाद्रीक्षवंत्याशुच नित्ययोगिनिमंत्रबीजसहितंयंत्रंप्रपूज्यंसदापा
र्श्वेरक्षतितस्यशत्रुरबलोलक्ष्मीस्थिरावेश्मनि ३ त्रिकोणंततःपंचकोणंसुयुक्तंततो
गर्भितंकोणमुक्तंमुनींद्रैः ततोवर्तुलंचाष्टपत्रंविधेयमिदंयोगिनीयंत्रमुक्तंशिवेन ४
॥ ॥इतिश्रीशिवयामलेयोगिनीदृशामंतर्दशाफलंसमाप्तं॥ ॥ ॥

इदंपुस्तकंजोगळेकरोपनामकपरशुरामेणलिखापितं॥स्वार्थंपरार्थंवा।

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

१२

योगिनीदशा समाप्तः॥५१॥



९२